दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णपञ्चमी
आश्विन् 15 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-09 ■ वर्ष-5 ■ अङ्क-342 | 1 | अक्तूबर 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 आगामिषु पंचवर्षेषु यात्रि-वाहनानाम् इन्धन-कार्यक्षमतायां षोडश-प्रतिशताधिकं संवर्धम् अभिलक्ष्य केन्द्र-शासनेन नूतनाः सीएएफई-नियमाः प्रवर्तिताः

4 मधुबनी-मण्डले रचितः साहित्यिकः इतिहासः

8 पितृपक्षः पूर्वजेभ्यः कृतज्ञतायाः पर्व


## अद्यतनीयं सुभाषितम्

**नासम्यक्कृतकारी स्यात्, अप्रमत्तः सदा भवेत्।**
**कण्टकोऽपि हि दुश्छिन्नो, विकारं कुरुते चिरम्।।**

भावार्थः- अर्थात्- किसी कार्य को अच्छी तरह संपन्न किए बिना न छोड़े और सावधान रहें। शरीर में गड़ा हुआ कांटा भी यदि पूर्ण रूप से निकाल न दिया जाए तो चिरकाल तक विकार उत्पन्न करता है।

# एशियन गेम्स' क्रीडा-महाकुम्भे भारतीय-धनुर्धरैः स्वर्णपदकानां 'हैट्रिक'-त्रयोविजयः समासादितः

## मुष्टि-द्वंद्वे च मिश्रित ट्रैप-दलेन स्वर्ण-कमलं विकसितम्



**हिमसंस्कृतवार्ता।** जापान-देशे आयोज्यमाने 'एशियन गेम्स' इति क्रीडा-महाकुम्भे भारतीयदलेन अद्य यावत् श्रेष्ठतमः प्रदर्शन-क्रमः प्रदर्शितः, यत्र एकेनैव दिने चत्वारि स्वर्ण-पदकानि विजितानि। भारतीय-धनुर्धरैः 'कम्पाउण्ड-आर्चरी' इत्याख्यायां स्पर्धायां महिला-दलं, मिश्रित-दलं, पुरूषदल-वर्गेषु च विजयं प्राप्य स्वर्ण पदकानां 'हैट्रिक' इति कीर्तिमानं रचितम्। एतस्मिनन्तराले पुरूषदलेन चीन-देशस्य दलं प्रत्यभिभूय अप्रतिमं स्वर्ण पदकं स्वायत्तीकृतम्। तदतिरिच्य, लक्ष्यवेद-प्रतियोगितायां मिश्रित-दलेन अपि स्वर्ण-पदकं प्राप्तम्।

### प्रधानमन्त्रिणा प्रदत्ताः शुभकामनाः

प्रधानमन्त्री नरेन्द्रमोदी नीरू-ढाण्डाम्, कायन-चेनाई-महोदयं च २०२६ वर्षस्य एशियन्-क्रीडासु 'ट्रैप्-मिश्रित-दलयोः' स्पर्धायां स्वर्णपदकप्राप्तये अभिनन्दितवान्। सामाजिक-माध्यमस्य सन्देशे श्रीमोदी अवदत् यत् असौ भारतीययुग्मः अन्तिमस्पर्धायां (फ़ाइनल्-मध्ये) एशियन्-कीर्तिमानं (रेकॉर्ड्) स्थापयित्वा अस्यां स्पर्धायां भारतस्य कृते प्रथमम् एशियन्-क्रीडा-स्वर्णपदकम् अवाप्तवान्। तयोः प्रदर्शनस्य प्रशंसां कुर्वन् प्रधानमन्त्री अकथयत् यत् इयं भारतीय-लक्ष्यवेधनाय (निशानेबाजी-क्रीडायै) एका अविस्मरणीया उपलब्धिः अस्ति।प्रधानमन्त्री ज्योति-सुरेखा-वेन्नम्, पृथिका-प्रदीपाम्, चिकिता-तनिपार्थी च अपि २०२६ वर्षस्य एशियन्-क्रीडासु 'महिला-कम्पाउण्ड्-दल-स्पर्धायां' स्वर्णपदकं जेतुं वर्धापितवान्। श्रीमोदी उक्तवान् यत् एतत् वैशिष्ट्यपूर्णम् अस्ति यतः तासां प्रदर्शनेन विश्वकीर्तिमानस्य समानता अपि कृता। प्रधानमन्त्रिणा प्रतिपादितं यत् भारतीय-धनुर्धरेभ्यः इयम् एका उत्कृष्टा उपलब्धिः वर्तते। श्रीमोदी क्रीडकेभ्यः तेषाम् आगामि-प्रयत्नेभ्यः शुभकामनाः प्रदत्तवान्।



### अचूकलक्ष्यवेधेन (सटीकतया) दलभावनया च भारतं संस्मरणीयः विजयः प्रापितः-राष्ट्रपतिः

सामाजिक-माध्यमस्य सन्देशे राष्ट्रपतिमहोदयोक्तवती यत् तयोः अचूकलक्ष्यवेधेन (सटीकतया) दलभावनया च भारतेन संस्मरणीयः विजयः प्रापितः।राष्ट्रपतिः मुर्मुः 'कम्पाउण्ड्-पुरुष-दल-स्पर्धायां' स्वर्णपदकविजये साहिल-राजेश-जाधवम्, गणेश-मणिरत्नम्-थिरुमुरुं, कुशल-दलालं च अपि अभिनन्दितवती। राष्ट्रपतिः तेषां प्रदर्शनं श्लाघयन्ती अवदत् यत् तिसृषु कम्पाउण्ड्-दल-स्पर्धासु स्वर्णपदकं विजित्य भारतीय-धनुर्विद्या-क्षेत्रेण एका उल्लेखीया उपलब्धिः प्राप्ता। एतेन सह, पुरुषाणां सप्त-अशीति (८७) किलोग्राम-भारवर्गे 'ग्रीको-रोमन्-मल्लयुद्धस्पर्धायां' कांस्यपदकं जेतुं सुनीलकुमाराय अपि अभिनन्दनम् अयच्छत्।


हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा




सांकेतिकं चित्रम्

### केन्द्रीय-मन्त्रिमण्डलेन आगामि-वित्तीय वर्षाय राबी-सस्यानां न्यूनतम-समर्थन-मूल्येषु वृद्धिः अनुमोदिता

आर्थिक-कार्य-मन्त्रिमण्डलीयसमित्या प्रवर्तमानवित्तीयवर्षस्य कृते सर्वेषामपि राबी-सस्यानाम् न्यूनतम-समर्थन-मूल्येषु श्लाघ्या वृद्धिः समनुमोदिता। नवदेहल्यां वार्तहर-सम्मेलने सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् कृषक-हित-रक्षणार्थम् असौ निर्णयः समाश्रितः। अनेन कुसुम-सस्यस्य समर्थन-मूल्ये सर्वाधिकं पंचसप्तत्युत्तरष-ट्शतरूप्यकाणां, सर्षपस्य त्रयोदशोत्तरचतुः शतं, चणकस्य त्र्याशीति, गोधूमस्य च पंचविंशति रूप्यकाणां प्रति-क्विण्टल्-मानतः परिवर्धनं विहितम्। मन्त्रिमण्डलेन 'प्राज्ञ-यातायात प्रबन्धन-प्रणाली' अपि समनुमोदिता।मन्त्रिणा प्रोक्तं यत् समित्या नवदिल्ली-आरक्षि-बलैः नवाशीत्युत्तर-सप्त-शतोत्तरैक-सहस्र-कोटि रूप्यकाणां व्ययेन प्रवर्त्यमाना 'प्राज्ञ यातायात प्रबन्धन प्रणाली' योजना अपि स्वीकृता। एतदतिरिच्य, मन्त्रिमण्डलेन 'हरित ऊर्जा-वीथि' इत्यस्य तृतीय-चरणम्, अथ ऐतिहासिकी 'पीएम-धारा' योजना च समनुमोदिता, येन राज्येषु केन्द्रशासित प्रदेशेषु च पञ्चत्रिंशदधिक-शत-गीगावाट परिमितस्य नवीकरणीय ऊर्जा उत्पादनस्य सुगम-सञ्चारणं भविष्यति।

## आगामिषु पंचवर्षेषु यात्रि-वाहनानाम् इन्धन-कार्यक्षमतायां षोडश-प्रतिशताधिकं संवर्धम् अभिलक्ष्य केन्द्र-शासनेन नूतनाः सीएएफई-नियमाः प्रवर्तिताः




भारत-प्रशासनस्य ऊर्जामन्त्रालयेन देशे समुपलब्ध-यात्रि-वाहनानाम् इन्धन-संरक्षण-दक्षताम् अभिलक्ष्य नूतना सीएएफई इति संस्थागत-मध्यमान-इन्धन दक्षता-मानदण्ड-नियमाः सम्यग् अधिसूचिताः। एते नूतनाः मानदण्डाः सप्तविंशत्युत्तरद्विसहस्र तमवर्षस्य अप्रैल-मासस्य प्रथम-दिनाङ्कात् समारभ्य द्वात्रिंशदुत्तरद्विसहस्र तमवर्षस्य मार्च-मासस्य एकत्रिंशत्-दिनाङ्क यावत् प्रवर्तिष्यन्ते, ये च पूर्व-प्रवर्तितानाम् मानदण्डानाम् स्थानम् अलङ्करिष्यन्ति। एतत् विधानं भारते विक्रयार्थम् उत्पादितानाम् अथवा आयातितानाम् वा सर्वेषामपि नूतन-यात्रि-वाहनानाम् उपरि समानभावेन नियंस्यति। इयं हि नियमनरचना वाहन-निर्माण-उद्योगस्य कृते महतीं नीति-स्थिरताम्, कार्य-सुगमताम्, नियमन स्पष्टतां च प्रदास्यति। योजनेयं प्राद्योगिकी-नवोन्मेषं समेधयन्ती भारतस्य वाहन-क्षेत्रम् उत्तरोत्तरम् ऊर्जा दक्षताम्, न्यून-इन्धन-व्ययं च प्रति नेष्यति।

## नवविंशत्युत्तरद्विसहस्रतमवर्षस्य समाप्तिं यावत् पञ्जाब-धरा व्यसन-मुक्ता विधास्यते -अमित शाहः



जालन्धर-नगरे समाहूतां मादकद्रव्य-मुक्त-पञ्जाब-महाभियानं सम्बोध्य केन्द्रीय-गृहमन्त्री अमितशाहः अवदत् यत् नवविंशत्युत्तर-द्विसहस्रतमवर्षस्य समाप्तिं यावत् पञ्जाब-राज्यं व्यसन-मुक्तं विधास्यते। तेन निगदितं यत् भारतीय-जनता-दलम् अङ्गीकृत-सङ्कल्पान् सर्वदा परिपूरयति। गृह-मन्त्रिणा प्रोक्तं यत् प्रशासनेन जम्मू-कश्मीर-क्षेत्रे आतङ्कवादः, पूर्वोत्तर-राज्येषु च उग्रवादः समूलं निरस्तः, सम्प्रति च पञ्जाब-राज्यस्य व्यसन-मुक्तिः एव शासनस्य मुख्यं लक्ष्यम् अस्ति। शहीद-भगतसिंह-ऊधमसिंहादि-पञ्जाब-भूमेः वीरहुतात्मभ्यः भावपूर्णं श्रद्धाञ्जलिं समर्पयन् असौ व्यथया व्याजहार यत् पुरा शौर्य-कृषि-समृद्धिभिः प्रथितं राज्यम् इदम् अधुना वर्धमानेन मादक-द्रव्य-व्यसनेन सन्तप्यते।

## पर्यटनक्षेत्रं केवलं भ्रमण-विनोद-विश्रामेषु परिसीमितं न भूत्वा अर्थव्यवस्थायाः मुख्यस्तम्भत्वेन अथ वृत्तयवसरस्य च प्रमुखस्रोतत्वेन वर्तते-केन्द्रीय-संस्कृति-पर्यटन-मन्त्री

नवदेहल्यां (ASSOCHAM) संस्थया आयोजितं राष्ट्रिय-पर्यटन-सम्मेलनम् सम्बोध्य केन्द्रीय-संस्कृति-पर्यटन-मन्त्री गजेंद्रसिंह शेखावतः प्राह यत् पर्यटनक्षेत्रमिदं सम्प्रति केवलं भ्रमण-विनोद-विश्रामेषु परिसीमितं न भूत्वा अर्थव्यवस्थायाः मुख्यस्तम्भत्वेन अथ वृत्तयवसरस्य च प्रमुखस्रोतत्वेन संवृत्तम्। मन्त्रिणा प्रोक्तं यत् वैश्विकीनाम् भू-राजनीतिक-अनिश्चिततानां मध्ये अपि भारतस्य पर्यटन-क्षेत्रं निरन्तरं समृद्धिम् आप्नोति।



## दोहा-नगरे कतार-व्यवसायिभ्यः भारतेन सह वाणिज्य-निवेश-सम्बन्धान् सुदृढीकर्तुम् आह्वानं कृतवती वित्तमन्त्री



वित्तमन्त्री निर्मला सीतारमण दोहा-नगरे कतार-व्यवसायिभ्यः भारतेन सह वाणिज्य-निवेश-सम्बन्धान् सुदृढीकर्तुम् आह्वानं कृतवती । सा भारतस्य द्रुत-विकासं, प्रवर्तनानवर्षस्य चतुः नवति दशांश पंच बिलियन्-डालर्-मितं कीर्तिमयं प्रत्यक्ष-वैदेशिक-निवेशं (FDI), तथा हि 'जापान-क्रेडिट रेटिङ्ग' संस्थया भारतस्य ऋण-क्षमता-निर्धारणे कृताम् उन्नतिम् उक्तवती । वित्तमन्त्रिणा होर्मुज-जलसंधौ अबाधित-सामुद्रिक-वाणिज्यं पुरस्कृत्य गल्फ-देशैः सह व्यापार-पुनरुद्धारस्य महत्त्वं प्रतिपादितम्। अस्मिन् उपवेशने कतार-देशस्य दश बिलियन्-डालर्-मितस्य निवेश-सङ्कल्पस्य कार्यान्वयनम्, भारते तस्य कार्यालय-स्थापना, अथ द्विपक्षीय-निवेश-सन्धिसम्बद्धा वार्ता द्रुत-गत्या चालयितुं सहमतिः जाता।

## विशुद्धा अद्यतनीकृता च मतदातृ-सूची लोकतन्त्रस्य आत्मा वर्तते - शिवराजसिंह चौहानः



नवदेहल्यां वार्ताहरैः सह सम्भाषण-क्रमे भारतीय-जनता-दलस्य वरिष्ठ नेता, केन्द्रीय कृषि-तथा-कृषक-कल्याण-मन्त्री शिवराजसिंह चौहानः न्यगादीत् यत् विशुद्धा अद्यतनीकृता च मतदातृ-सूची लोकतन्त्रस्य आत्मा वर्तते। मन्त्रिणा प्रोक्तं यत् मतदातृ-सूच्याम् अशुद्धानाम् अनर्हाणां च नाम्नाम् समावेशेन निर्वाचन-प्रक्रियायाः शुचिता प्रभाविता भवेत्। असौ निर्वाचन-अनियमितताः अधिकृत्य विपक्षेण कृतान् सर्वानपि आक्षेपान् दृढतया प्रत्यख्यात् ।

## अंशविपणिसमाचारः

**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, मुम्बई ३० सितम्बर २०२६।**

भारतीय-अंशविपण्यां सितम्बरमासस्य अन्तिमे व्यवसायदिने बुधवासरे प्रमुखसूचकाङ्कयोः पुनः अवनतिः अभवत्। बीएसई- सेन्सेक्स- सूचकांकः ४८.७८ अङ्कैः (०.०७%) पतित्वा ७२,४८०.२९ अङ्केषु, तथा निफ्टी-५० सूचकांकः ९५.७५ अङ्कैः (०.४२%) अवनतः सन् २२,६२०.४५ अङ्केषु समापितः। एतेन निफ्टीसेन्सेक्सयोः अवनतिः तृतीयं निरन्तरं सत्रम् अभवत्। विपण्याः आरम्भे क्रयणप्रवृत्तिः दृश्यते स्म, किन्तु उच्चस्तरे लाभप्राप्तिः तथा अपरिष्कृततैलस्य वर्धमानमूल्येन पुनः विक्रय भारः वर्धितः। अमेरिका-ईरानयोः वार्तासु अनिश्चितता अपि निवेशकानां मनोभावं प्रभावितवती। ब्रेन्ट-अपरिष्कृततैलस्य मूल्यं १०३ डॉलर-प्रतिबैरल इति आसीत्। क्षेत्रीयविपण्यां धातु, औषधि, स्वास्थ्यसेवा तथा उपभोक्तावस्तुक्षेत्रेषु भारः दृश्यते स्म। तद्विपरीतं बैंकिङ्, रियल्टी, कतिपयेषु वाहनांशेषु च क्रयणेन प्रमुखसूचकाङ्कयोः हानिः सीमिता अभवत्। बैंकनिफ्टी ०.६९ प्रतिशतं वर्धितः। प्रमुखेषु अंशेषु यत्र कोटक महिन्द्राबैंक, आईसीआईसीआई बैंक, इण्डिगो तथा एक्सिस् बैंक एते वर्धिताः, तत्र एव एटर्नल, सन फार्मा, टाइटन, टाटा स्टील तथा अडाणी पोर्ट्स एते अंशा अवनताः अभवन्। सितम्बरमासः भारतीय-अंशविपण्याः कृते कठिनः सिद्धः। रॉयटर्स इत्यनुसृत्य मासे निफ्टी ५० प्रायः ६.१% तथा सेन्सेक्स ५.८% अवनतौ अभवताम्। विदेशी निवेशकैः सितम्बरमासे भारतीय-अंशेषु प्रायः २.७ अरब डॉलर मूल्यस्य विक्रयः कृतः। उच्चवैश्विकबन्धकप्रतिफलानि, अपरिष्कृततैलस्य मूल्यवृद्धिः तथा मध्यपूर्वस्य भूराजनैतिकसंघर्षः विपण्यां प्रमुखाः प्रभावकारकाः अभवन्। अतः वर्तमानविपणिपरिदृश्ये अपरिष्कृततैलस्य मूल्यं, विदेशी निवेशकानां प्रवाहः, वैश्विकवृद्धिमानम्, बन्धकप्रतिफलानि, अमेरिका-ईरानयोः घटनाक्रमः आगामी व्यवसायिकदिनेषु महत्त्वपूर्णाः कारकाः भविष्यन्ति।

# आधार-प्रमाणीकरणे बिहारस्य महती उपलब्धिः भारतीय- विशिष्ट- अभिधान- प्राधिकरणेन बिहार-सर्वकाराय 'राज्य- प्रगति- पुरस्कारः' समर्पितः



**हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलीपुत्रम्**
बिहार-सर्वकारस्य सूचना-प्रौद्योगिकी-विभागस्य माननीयमन्त्रिणा नीतीशमिश्रेण विज्ञापितं यत् कोलकातानगरे २९ सितम्बर २०२६ दिनाङ्के आयोजिते पञ्चमे 'आधार-संवाद'-समारोहे भारतीय- विशिष्ट- अभिधान- प्राधिकरणेन बिहारसर्वकारस्य सूचना-प्रौद्योगिकी-विभागाय आधार- प्रमाणीकरणक्षेत्रे उत्कृष्टप्रदर्शनाय प्रतिष्ठितः 'राज्य-प्रगति-पुरस्कारः- सर्वोत्कृष्ट-प्रमाणीकरण- प्रत्यावर्तनम्' समर्पितः।

अस्मिन् अवसरे प्राधिकरणस्य मुख्य- कार्यकारी-अधिकारिणा सौरभविजयेन बिहारराज्यस्य कार्यदक्षतायै विशेषा प्रशंसा विहिता, सम्पूर्णे देशे च बिहारराज्यं 'सर्वोत्कृष्ट-प्रदर्शनकारी-राज्यम्' इति रूपेण समादृतम्। एषः गौरवपूर्णः सम्मानः राज्ये अङ्कीयसेवानां प्रभाविनः सुलभस्य च क्रियान्वयनस्य दिशि बिहारस्य महतीं सिद्धिमभिव्यनक्ति।नीतीशमिश्रेण विस्तरेण न्यवेदयत् यत् बिहारराज्ये प्रतिदिनं पञ्चलक्षाधिकानि (५,००,०००+) आधार-प्रमाणीकरणानि साफल्येन निष्पाद्यन्ते। एतावति बृहत्-प्रमाणे आधार-प्रमाणीकरणस्य प्रभावपूर्णं समयबद्धं च सम्पादनं राज्ये अङ्कीय-सेवानां व्याप्तिं दृढीकरोति, अङ्कीय-सेवातन्त्रं प्रति नागरिकाणां विश्वासं चापि प्रबलीकरोति। माननीयमन्त्रिणा स्पष्टीकृतं यत् इयं महती उपलब्धिः माननीयस्य मुख्यमन्त्रिणः सम्राटचौधरी- महोदयस्य कुशल-मार्गदर्शनस्य, विभागीय- अधिकारिणां कर्मचारिणां च अहर्निश-सहयोगस्य परिणामः वर्तते। सर्वकारस्य दूरगामि-नेतृत्वेन विभागस्य च सतत-प्रयासेन राज्ये अङ्कीय-सेवानां विस्ताराय सुदृढीकरणाय च नूतना गतिः सञ्चारिता। एषः पुरस्कारः नागरिक-केन्द्रितायाः, सुरक्षितायाः, पारदर्शिन्याः प्रभाविन्याश्च अङ्कीय- व्यवस्थायाः निर्माणे बिहार-सर्वकारस्य दृढ-सङ्कल्पं प्रमाणीकरोति।

# बहादुरपुरे आधुनिक- आवासीय- पुनर्विकासस्य मार्गः प्रशस्तः; बिहार- राज्य- आवास- मण्डलं एनबीसीसी- संस्थया सह करिष्यति सहमतिज्ञापनम्



**हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्**
नगरविकास, आवासविभागस्य माननीयमन्त्रिणा नीतीशमिश्रवर्येण विज्ञापितं यत् पाटलिपुत्रस्थ-बहादुरपुरस्य षष्ठ-खण्डे (सेक्टर-६) स्थितायाः बिहार- राज्य- आवासमण्डलस्य जीर्णायाः आवासीय- आवासे स्व-वित्तपोषित-पुनर्विकासस्य दिशि महत्त्वपूर्णा पहलः कृता। अस्य प्रकल्पस्य क्रियान्वयनाय 'एनबीसीसी (इण्डिया) लिमिटेड' इत्यनया संस्थया सह सामञ्जस्यपत्रे हस्ताक्षरकरणाय, योजना- सम्बन्धि- आवश्यक- निर्णयान् स्वीकर्तुं बिहार- राज्य- आवासमण्डलाय अधिकार- प्रदानाय मन्त्रिपरिषदा स्वीकृतिः प्रदत्ता। तेन सूचितं यत् एवमेव बहादुरपुरस्य पञ्चमखण्डे (सेक्टर-५) दूरदर्शन- प्रसारण-गोपुरस्य निकटे बिहार- राज्य- आवास-मण्डलस्य प्रायः सार्धाष्ट-एकड् (८.५ एकड्) परिमितायां भूमौ स्व-वित्तपोषित-प्रकल्पस्य विकासस्य मार्गोऽपि प्रशस्तः जातः। अस्यापि योजनायाः कार्य-निष्पादनाय 'एनबीसीसी' संस्थया सह सामञ्जस्य-पत्रकरणाय, योजना- सम्बद्ध-निर्णयान् ग्रहीतुं बिहार-राज्य-आवास-मण्डलाय अधिकाराय मन्त्रिमण्डलेन अनुमतिः दत्ता।

नीतीशमिश्रेणोक्तं यत् माननीयस्य मुख्यमन्त्रिणः सम्राटचौधरी-महोदयस्य दूरदर्शिन्या दृष्ट्या सशक्तनेतृत्वेन च बिहारस्य नगरीय-क्षेत्राणां समग्र-आधुनिक-विकासाय नूतना दिशा प्राप्यते। बहादुरपुरस्य आवासीय-प्रकल्प-सम्बद्धाय एतस्मै महत्त्वपूर्णनिर्णयाय सः माननीय-मुख्यमन्त्रिणे मन्त्रिपरिषदः समेभ्यः मन्त्रिभ्यश्च कृतज्ञतां ज्ञापयामास। मन्त्रिणा दृढतया प्रतिपादितं यत् सर्वकारः नागरिकाणां कृते उत्तमाः, सुरक्षिताः, सुव्यवस्थिताश्च आवासीय-सुविधाः प्रदातुं पूर्णतया सङ्कल्पबद्धः वर्तते। माननीयमन्त्रिणा रेखाङ्कितं यत् एताभ्यां द्वाभ्यां प्रकल्पाभ्याम् उपलब्धायाः भूमेः आवासीय-सम्पत्तेश्च श्रेष्ठतमः उपयोगः सुनिश्चितः भविष्यति, येन आधुनिकः सुव्यवस्थितश्च आवासीयविकासः प्रवर्धिष्यते। जीर्णानाम् आवासीयपरिसराणां पुनर्विकासेन नागरिकाणां कृते सुरक्षितं समुन्नतञ्च आवासीय-वातावरणं प्रदातुं महती प्रगतिः भविष्यति




# तन्त्रज्ञान-शिक्षा-साहित्य-सङ्गीतैः संस्कृतस्य नूतनं रूपम्

हिमसंस्कृतवार्ता मुम्बई। भारतीय-प्रौद्योगिकी-संस्थान-मुम्बय्याः संस्कृतशिक्षणकेन्द्रेण 'सहस्रमुखेषु संस्कृतम्' इति ध्येयवाक्यं साकारयन् संस्कृत-दिनोत्सवः २०२६ IIT Bombay परिसरे भव्यतया आयोजितः। तन्त्रज्ञानम्, शिक्षणम्, साहित्यं, कला, सङ्गीतं च एकत्र संयोजयन् अयं महोत्सवः संस्कृतस्य समकालीनप्रस्तुतौ नूतनां दिशं प्रदर्शितवान्। अष्टशताधिकाः प्रतिभागिनः प्रत्यक्षतया अन्तर्जालमाध्यमेन च अस्मिन् समारोहे सोल्लासं सम्मिलिताः। समारोहस्य प्रमुखविशेषत्वेन टी.सी.एस्.-संस्थायाः मुख्यकार्यकारी-अधिकारी श्री के. कृतिवासन्-महोदयः मुख्यातिथिरूपेण उपस्थितः अभवत्। तेन डॉ. श्रीधरद्वारा निर्मितं 'प्रतिपत्ति' इति संस्कृतशिक्षणसाधनं लोकार्पितम्। स्वभाषणे तेन संस्कृताध्ययनस्य महत्त्वं तथा पाणिनीयव्याकरणस्य अध्ययनानुभवं प्रतिपादितम्। डॉ. श्रीधरः तथा आचार्यः गणेशरामकृष्णश्च तन्त्रज्ञानस्य संस्कृतशिक्षणेन सह समन्वयात् उद्भवन्तीनां सम्भावनानां विषये स्वविचारान् प्रकटितवन्तौ।समारोहे संस्कृतशिक्षणकेन्द्रस्य नवीनपाठ्यक्रमस्य उद्घाटनं तथा गतवर्षीयछात्राणां प्रमाणपत्रवितरणं सम्पन्नम्। श्रीमती नीता सिंह-महोदयया तथा डॉ. विज्ञापना गोकर्णकर-महोदयया विरचितयोः संस्कृत-भारतीयज्ञानपरम्परासम्बद्धयोः द्वयोः ग्रन्थयोः विमोचनमपि अभवत्। इण्डियात्रा-समूहेन आयोजितया संस्कृत-प्रश्नोत्तर्या प्रतिभागिनः ज्ञानविनोदेन संस्कृतेन सह सम्बद्धाः अभवन्। कार्यक्रमस्थले संस्कृतपुस्तकानां, प्रकाशनानां, संस्कृतप्रेरितवस्तूनां च विक्रयव्यवस्थापि कृता आसीत्।समारोहस्य समापनं 'श्राव्या – The Sanskrit Symphony' इत्याख्येन सङ्गीतमयेन कार्यक्रमेण अभवत्। संस्कृतश्रीः एण्टरप्राइजेस्-संस्थायाः गन्धर्वसख्यम् (G.S. Band) इत्यनेन प्रस्तुतया आधुनिकसङ्गीतशैल्या संस्कृतभाषायाः सुमधुरः समन्वयः साधितः। प्रौद्योगिकी-शिक्षा-साहित्य-कला-सङ्गीतानां समन्वयेन संस्कृत-दिनोत्सवः २०२६ संस्कृतस्य वर्तमानप्रासङ्गिकतां भविष्यसम्भावनाश्च प्रकाशयन् 'सहस्रमुखेषु संस्कृतम्' इति ध्येयस्य सजीवं प्रतिबिम्बम् अभवत्।

# मधुबनी-मण्डले रचितः साहित्यिकः इतिहासः

## एकादशवर्षीयस्य आदर्शभारद्वाजस्य यात्रावृत्तान्तस्य "नन्हकी आँखिसं भूटान" इत्यस्य लोकार्पणम्, पद्मश्री-विभूतिभिः प्रदत्ताः आशीर्वादाः



**हिमसंस्कृतवार्ताः- राघवनाथ झा, मधुबनी (बिहारम्)** मिथिलायाः सांस्कृतिक-राजधान्यां मधुबनीमण्डले मिथिला-चित्रकला-संस्थानस्य सभागारे अद्य एकः ऐतिहासिकः भावुकश्च क्षणः समुपस्थितः जातः। मिथिला-धरायाः एकादश-वर्षीय- बाल- साहित्यकारेण आदर्शभारद्वाजेन मैथिलीभाषायां रचितस्य यात्रावृत्तान्तस्य "नन्हकी आँखिसं भूटान- एक बाल साहित्यकारक प्रेरणादायक यात्रावृत्तांत" इत्यस्य पुस्तकस्य भव्यं गरिमामयं च लोकार्पणं सम्पन्नम्।

### पद्मश्री-विभूतीनाम् ऐतिहासिकी उपस्थितिः

अस्य कार्यक्रमस्य विशिष्टं वैशिष्ट्यम् आसीत् यत् मिथिलायाः ख्यातिप्राप्ताः पद्मश्रीविभूतयः एकस्मिन् एव मञ्चे समुपस्थिताः आसन्। पद्मश्री- बौआदेवी, पद्मश्री- शान्तिदेवी, पद्मश्री- दुलारीदेवी, पद्मश्री- शिवनपासवानः, पद्मश्री- रानीदेवी च बाललेखकाय स्वकरकमलैः शुभाशीर्वादान् प्राददुः। एताभिः विभूतिभिः प्रतिपादितं यत् आदर्शेण मिथिलायाः कला-साहित्यश्च अन्तर्राष्ट्रियपटले नूतनरूपेण समलङ्कृतः

### मुख्यातिथेः सम्बोधनम्

समारोहस्य मुख्यातिथिभिः मिथिला- चित्रकला-संस्थानस्य निदेशकैः चन्द्रशेखरप्रसादसिंह-महोदयैः पुस्तकस्य लोकार्पणं विहितम्। स्वकीय-अध्यक्षीयभाषणे तैः प्रोक्तं यत्- "केवलं एकादशवर्षीयवयसि भूटानसदृशस्य देशस्य यात्रामधिकृत्य मैथिलीभाषायाम् एतादृश्या प्रौढतया लेखनम् असाधारणप्रतिभायाः परिचायक मस्ति। मैथिलीबालसाहित्ये यात्रावृत्तान्तविधायाम् इयं प्रथमा कृतिः सिद्धा भवति, या आगामिसन्ततये प्रेरणास्रोतः भविष्यति।" अस्मिन् गरिमामये अवसरे डॉ. रानी झा, प्रतीकप्रभाकरवर्यः, संस्थानस्य उपनिदेशकः नीतीशकुमारवर्यः, लेखाधिकारी सुरेन्द्रकुमारश्च उपस्थिताः आसन्।

### पुस्तकस्य वैशिष्ट्यम्

"नन्हकी आँखिसं भूटान" इति कृतिः केवलं यात्राविवरणमात्रं न, अपि तु बालमनसः निष्कपटदृष्ट्या दृष्टस्य भूटानस्य सजीवं वृत्तम् अस्ति। अस्मिन् पुस्तके भूटानस्य स्वच्छता, पर्यावरण- संरक्षणं, बौद्धसंस्कृतिः, सकारात्मकं जीवनदर्शनं, भारत-भूटानदेशयोः प्रगाढमैत्री च सरलायां प्राञ्जलायां मैथिलीभाषायां निबद्धा वर्तते। कार्यक्रमस्य समापने आदर्शभारद्वाजस्य कुटुम्बेन झञ्झारपुरपक्षतः समेभ्यः समागतेभ्यः अतिथिभ्यः, पत्रकारसङ्घेभ्यः, शुभचिन्तकेभ्यश्च हार्दी कृतज्ञता ज्ञापिता।



# उदयपुरे डॉ. भावनाशर्मा संस्कृतकक्षाः-

## प्रतियोगितापरीक्षार्थिनां कृते उपयोगी शिक्षाकेन्द्रम्

**हिमसंस्कृतवार्ताः- नागेन्द्रकुमारपाण्डेयः उदयपुरं, राजस्थानम्।** राजस्थानस्य उदयपुरनगरे संस्कृतभाषायाः अध्ययन- अध्यापनक्षेत्रे "Dr. Bhawana Sanskrit Classes Udaipur" इति नाम्ना एकं शिक्षाकेन्द्रं सञ्चालितम् अस्ति। संस्कृतभाषायाः अध्ययनं, अध्यापनं, संस्कृतविषयसम्बद्धासु विभिन्नासु प्रतियोगितापरीक्षासु च सफलतां प्राप्तुं इच्छुकानां विद्यार्थिनां कृते एतत् केन्द्रं महत्त्वपूर्णं शिक्षणस्थानं भवितुम् अर्हति। प्राप्तविवरणानुसारं उक्तं संस्कृतशिक्षाकेन्द्रं उदयपुरनगरस्य केशवनगर-अयड- शोभागपुरा- क्षेत्रे, सहकारी सुपरमार्केट, १०० फीट मार्गस्य समीपे स्थितम् अस्ति। अत्र संस्कृतभाषां प्रति रुचिमतां विद्यार्थिनां कृते अध्ययन- अध्यापनसम्बद्धाः सेवाः उपलब्धाः सन्ति। वर्तमानसमये संस्कृतभाषायाः महत्त्वं केवलं विद्यालयीयशिक्षायां सीमितं नास्ति। संस्कृतविषयस्य अध्ययनं कृत्वा अनेकाः विद्यार्थी शिक्षकपदेषु, व्याख्यातृपदेषु, प्राध्यापकपदेषु, अनुसन्धानक्षेत्रे, विभिन्नासु प्रतियोगितापरीक्षासु अवसरान् अन्वेष्टुं शक्नुवन्ति। अतः संस्कृतविषये व्यवस्थितमार्गदर्शनस्य आवश्यकता दिने दिने वर्धते। संस्कृतशिक्षणस्य क्षेत्रे BPSC शिक्षक भर्तीपरीक्षा, REET, संस्कृत-व्याख्याता परीक्षा, UGC-NET संस्कृतं, UPTET सदृशाः शिक्षकपात्रतापरीक्षाः, MPTET, अन्याः राज्यस्तरीयाः शिक्षक- पात्रतापरीक्षाः महत्त्वपूर्णाः सन्ति। एतासु परीक्षासु संस्कृतभाषा, संस्कृतव्याकरणं, साहित्यं, काव्यं, दर्शनं, भारतीयसंस्कृतेः ज्ञानं शिक्षाशास्त्रसम्बद्धाः विषयाः परीक्षार्थिभिः अध्येतव्याः भवन्ति।

डॉ. भावना शर्मा इत्यस्याः नाम्ना सम्बद्धं "Dr. Bhawana Sanskrit Classes Udaipur" इति केन्द्रं संस्कृताध्ययनस्य इच्छुकानां विद्यार्थिनां कृते स्थानीयस्तरे शिक्षणस्य अवसरं प्रददाति। विशेषतः संस्कृतशिक्षकत्वं प्राप्तुम् इच्छुकाः अभ्यर्थिनः विभिन्नासां पात्रतापरीक्षाणां तथा भर्तीपरीक्षाणां पाठ्यक्रमानुसारं अध्ययनं कर्तुं शक्नुवन्ति। अद्यतनकाले संस्कृतशिक्षकस्य पदं प्राप्तुम् इच्छुकाः अभ्यर्थिनः केवलं संस्कृतभाषायाः ज्ञानमेव न, अपि तु संस्कृतव्याकरणस्य, साहित्यस्य, शिक्षणविधेः, बालमनोविज्ञानस्य तथा सामान्यज्ञानस्य अपि सम्यक् अध्ययनं कुर्वन्ति। शिक्षकपात्रतापरीक्षासु सफलतायै नियमिताभ्यासः, पूर्ववर्षीयप्रश्नपत्राणां अध्ययनम्, अनुकरणपरीक्षाः, समयबद्धप्रश्नाभ्यासः च विशेषतया उपयोगिनः भवन्ति। संस्कृतव्याख्यातृपदं, विद्यालयीयसंस्कृत-शिक्षकपदं तथा महाविद्यालयीय-अध्यापनक्षेत्रं प्रति गन्तुम् इच्छुकानां विद्यार्थिनां कृते UGC-NET संस्कृतम् इत्यादीनाम् परीक्षाणाम् अपि विशेषं महत्त्वम् अस्ति। एतादृशेषु क्षेत्रेषु उच्चस्तरीय-संस्कृतसाहित्यस्य, व्याकरणस्य, दर्शनस्य तथा भारतीयज्ञानपरम्परायाः गहनम् अध्ययनम् अपेक्षितम् अस्ति। संस्कृतभाषायाः अध्ययनं केवलं रोजगारप्राप्तेः साधनं न, अपि तु भारतस्य प्राचीनज्ञानपरम्परायाः, दर्शनस्य, साहित्यस्य, संस्कृतेः च परिचयस्य प्रभावी माध्यममपि अस्ति। संस्कृतस्य माध्यमेन वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, काव्यानि, नीतिग्रन्थाः तथा विविधाः शास्त्रीयग्रन्थाः पठितुं शक्यन्ते।

अतः उदयपुरनगरे संस्कृताध्ययनस्य प्रसाराय स्थापितानि शिक्षणकेन्द्राणि संस्कृतविद्यार्थिनां कृते उपयोगीनि सिद्धानि भवितुम् अर्हन्ति। Dr. Bhawana Sanskrit Classes Udaipur इति केन्द्रस्य माध्यमेन संस्कृतविषये अध्ययनं कर्तुम् इच्छुकाः विद्यार्थिनः स्वकीयलक्ष्यानुसारं पाठ्यक्रमस्य, शुल्कस्य, कक्षासमयस्य, परीक्षासम्बद्धस्य मार्गदर्शनस्य च विषये जानकारीं प्राप्तुं शक्नुवन्ति। सार्वजनिकविवरणानुसारं केन्द्रस्य सम्पर्कदूरभाषसंख्या +९१ ९१६६९ ४५११९ इति निर्दिष्टा अस्ति। तथापि प्रवेशः, शुल्कम्, पाठ्यक्रमः तथा वर्तमानकक्षाणां स्वरूपं ज्ञातुं विद्यार्थिभिः केन्द्रे प्रत्यक्षं सम्पर्कं कृत्वा नवीनतमसूचना प्राप्तव्या।

संस्कृतभाषायाः प्रचार-प्रसाराय, संस्कृताध्ययनस्य प्रति विद्यार्थिनां रुचिवर्धनाय तथा संस्कृतशिक्षकत्वं प्राप्तुम् इच्छुकानाम् अभ्यर्थिनां मार्गदर्शनाय एतादृशानि शिक्षणकेन्द्राणि निश्चितरूपेण उपयोगी भूमिका निर्वहितुं शक्नुवन्ति।

# ललित-नारायण-मिथिला-विश्वविद्यालये दर्शनशास्त्र-विभागे "श्रीमद्भगवद्गीतायां भारतीय-ज्ञान-परम्परायाः बीज-तत्त्वानि" इत्यधिकृत्य विचार-सङ्गोष्ठी सम्पन्ना



**हिमसंस्कृतवार्ता दरभङ्गाः विश्व मोहन झा, दरभंगा ।** ललित-नारायण-मिथिला-विश्वविद्यालयस्य दर्शनशास्त्र-विभागस्य सभागारे "श्रीमद्भगवद्गीतायां भारतीय-ज्ञान-परम्परायाः बीज-तत्त्वानि" इति विषये एकल-व्याख्यान-कार्यक्रमः साफल्येन आयोजितः। कार्यक्रमस्य अध्यक्षता विभागाध्यक्षया डॉ. शिखर-वासिन्या कृता। मुख्यवक्तृ-रूपेण विभागस्य प्राक्तन-विभागाध्यक्षाः डॉ. रुद्रकान्त-अमराः उपस्थिताः आसन्। सम्मानित-अतिथिरूपेण पूर्व-विभागाध्यक्षाः डॉ. शिवानन्द-झा-महोदयाः मञ्चम् अलञ्चक्रुः।कार्यक्रमस्य मङ्गलारम्भः राष्ट्रियगीतेन "वन्दे मातरम्" इत्यनेन जातः। तदनन्तरं राष्ट्रगानस्य कुलगीतस्य च सामूहिकं गानम् अभवत्। ततः परं दीप-प्रज्वालनेन कार्यक्रमस्य विधिवद् उद्घाटनं सम्पन्नम्। अनन्तरम् अतिथयः मिथिला-परम्परायाः प्रतीकेन पागेन, वस्त्रेण (चादरेण), पर्यावरण-चेतनायाः प्रतीक-स्वरूपेण च पादपेन समलङ्कृताः। स्वागत-भाषणं कुर्वती विभागस्य प्राध्यापिका डॉ. प्रियंका-रायः अवदत् यत् — "गीता भारतीय-चिन्तनस्य सा अविरला धारा अस्ति, यस्याम् उपनिषदां ब्रह्मविचारः, साङ्ख्यस्य तत्त्व-मीमांसा, योगस्य च साधना युगपदेव प्रवहन्ति। एतादृशेन विचार-मन्थनेन नूतन-सन्ततेः स्वकीयायाः समृद्ध-ज्ञान-परम्परायाः सह संलग्नीभवनस्य सुवर्ण-अवसरः प्राप्यते।" सम्मानित-अतिथिभिः डॉ. शिवानन्द-झा-महोदयैः प्रतिपादितं यत् — "ज्ञान-परम्परा केवलम् अतीतस्य सम्पत्तिः नास्ति, अपितु जीवन-यापनस्य दृष्टिः अस्ति। गीतायाः निष्काम-कर्म-सिद्धान्तः अद्यापि व्यक्तेः समाजस्य च मार्गदर्शनं करोति।" मुख्यवक्तृभिः डॉ. रुद्रकान्त-अमरैः स्वकीये विस्तृते व्याख्याने श्रीमद्भगवद्गीतायां निहितानां भारतीय-ज्ञान-परम्परायाः बीज-तत्त्वानां क्रमबद्धं गम्भीरञ्च विवेचनं प्रस्तुतम्। तैः आत्मनः नित्यता, स्थितप्रज्ञता, निष्काम-कर्म, ज्ञान-कर्म-भक्तीनां समन्वयः, समत्व-योगः इत्यादिषु बीज-तत्त्वेषु विशेषः प्रकाशः निक्षिप्तः। तैः प्रोक्तं यत् — "गीता कस्यचिद् एकस्य दर्शनस्य पुस्तको न, अपितु भारतीय-ज्ञान-परम्परायाः बीज-कोशः वर्तते। अत्र उपनिषदाम् आत्मविद्या, साङ्ख्यस्य तत्त्व-विवेकः, योगस्य समत्व-दृष्टिः, कर्मणः लोकोपयोगिता च समभावेन प्राप्यन्ते। एतानि सर्वाणि तानि बीजानि सन्ति, यानि कालान्तरे भारतीय-दर्शनस्य विविधासु शाखासु पल्लवितानि।" तेन अग्रे प्रतिपादितं यत् — "गीतायाः महत्तमं वैशिष्ट्यम् एतत् यत् सा ज्ञानं जीवनात् पृथक् न करोति। अत्र तत्त्व-चिन्तनस्य लक्ष्यं केवलं परिज्ञानं नास्ति, अपितु ज्ञात्वा आचरणम् अस्ति। अत एव अर्जुनस्य विषादः दार्शनिक-जिज्ञासायां परिणमति, सा च जिज्ञासा कर्तव्य-बोधे पर्यवस्यति। इयमेव भारतीय-ज्ञान-परम्परायाः मौलिकता यद् अत्र अध्यात्मं व्यवहारश्च, व्यक्तिः समाजश्च, चिन्तनम् आचरणञ्च परस्पर-विरोधिनी न, अपितु परस्परं पूरके स्तः। अद्यतन-सङ्कटग्रस्त-समये गीतायाः एषः समन्वयवादी दृष्टिकोणः नूतन-पीढ्यै सन्तुलिताम् उत्तरदायिनीञ्च जीवन-दृष्टिं प्रदातुं समर्थः अस्ति।" अध्यक्षीय-उद्बोधने विभागाध्यक्षया डॉ. शिखर-वासिन्या उक्तं यत् — "दर्शनशास्त्रस्य लक्ष्यं केवलं विचार-मात्रं न, अपितु विचारस्य जीवने अवतरणम् अस्ति। गीता अस्मान् ज्ञान-कर्मणोः समन्वय-मार्गं दर्शयति। दर्शनशास्त्र-विभागः एतादृशां तात्त्विक-विमर्शानां परम्परां सततं वर्धयिष्यति।" कार्यक्रमस्य धन्यवादारोहणं डॉ. संजीवकुमार-साह-महोदयेन कृतम्। तैः समेभ्यः अतिथिभ्यः, वक्तृभ्यः, प्राध्यापकेभ्यः, शोधार्थिभ्यः, छात्रेभ्यश्च हार्दी कृतज्ञता समर्पिता। मञ्च-सञ्चालनं विभागस्य छात्रेण ईशानकुमारेण विहितम्। अस्मिन् कार्यक्रमे विभागस्य सर्वे आचार्याः, शोधच्छात्राः, बहवः अध्ययनरताः विद्यार्थिनश्च उपस्थिताः आसन्।

# वैद्युत-बस-यानेभ्यः (E-buses) सज्जाः निजी-संचालकाः ५०० यानानां क्रयणात् पूर्वं नीतिं स्पष्टीकुर्यात् सर्वकारः




**क्रयण-समये एव पञ्चाशत्-प्रतिशतं आर्थिक-साहाय्यस्य याचना; मार्गानुज्ञापत्रे 'एसआरटी'-करे, सुलभे वित्तकोष-ऋणे च स्थितेः स्पष्टीकरणाय आग्रहः**

हिमसंस्कृतवार्ता — शिमला। हिमाचलप्रदेशे निजी-बस-संचालकाः राज्ये वैद्युत-सार्वजनिक-परिवहनस्य प्रोत्साहनाय प्रायः पञ्चशतं वैद्युत-मञ्च-वाहन-बस-यानानि क्रेतुं सज्जाः सन्ति। 'हिमाचलप्रदेश-निजी-बस-संचालक-सङ्घस्य' प्रदेश-महासचिवेन रमेश-कमल-महोदयेन प्रतिपादितं यत् निजी-संचालकाः सर्वकारस्य 'वैद्युत-गतिशीलता-प्रयास-योजनायां सहभागाय पूर्णतया सिद्धाः सन्ति; किन्तु बस-यानानां क्रयणात् पूर्वं सर्वकारेण आर्थिक-साहाय्यं, मार्गानुज्ञापत्रं विशेष-मार्ग-करः (एसआरटी'), वित्तकोष-ऋणं (Bank Loan) च अधिकृत्य सर्वकाराणां नीतिः साकल्येन स्पष्टीकरणीया। रमेश-कमल-महोदयेन विज्ञापितं यत् सर्वकारेण वैद्युत-बस-यानानां क्रयणे पञ्चाशत्-प्रतिशतं (५०%) आर्थिक-साहाय्य-प्रदानस्य (अनुदानस्य) घोषणा विहिता अस्ति। वैयक्तिक-संचालकानां दृढा याचना अस्ति यत् इदम् आर्थिक-साहाय्यं यानस्य क्रयण-समये एव प्रदातव्यं, न तु वित्तकोष-ऋणस्य सम्पूर्ण-कालावधेः समाप्तेः अनन्तरम्। सः अवदत् यत् वैद्युत-बस-यानानां विपुलं मूल्यं विचिन्त्य बहु-वर्षानन्तरं प्राप्यमाणेन अनुदानेन संचालकानाम् उपरि प्रारम्भिकः आर्थिक-भारः भृशं वर्धिष्यते। क्रयण-काले एव साहाय्य-प्राप्त्या प्रारम्भिक-धन-समर्पणे वित्तकोष-वित्तपोषण-व्यवस्थायां च महती सुगमता भविष्यति।

# मार्गानुज्ञापत्र-नीतेः (Route Permit) स्पष्टीकरणस्य याचना

सङ्घेन वैद्युत-मञ्च-वाहन-बस-यानानां कृते मार्गानुज्ञापत्र-सम्बन्धे अपि स्पष्ट-नीतेः निर्गमनाय आग्रहः कृतः। रमेश-कमल-महोदयः अपृच्छत् यत् नूतनानां वैद्युत-बस-यानानां कृते नूतनानि मार्गानुज्ञापत्राणि कया प्रक्रियया निर्गमिष्यन्ति, विद्यमानेभ्यः वैयक्तिक-चालकेभ्यः अस्मिन् प्राथमिकता लप्स्यते न वा, पुरातनानुज्ञापत्राणां च वैद्युत-यानेषु रूपान्तरणस्य (परिवर्तनस्य) सुविधा भविष्यति वा न वा।एतदतिरिक्तं नूतन-मार्गाणाम् अभिज्ञानं, तेषाम् अधिसूचना, अनुज्ञापत्र-कालावधिः, अन्ये च नियमाः पूर्वमेव स्पष्टीकरणीयाः। तेन प्रोक्तं यत् अनुज्ञापत्र-स्थितेः अज्ञानात् चालकाः कोटिशः रूप्यकाणां व्ययेन वैद्युत-बस-यानानां क्रयणस्य संकटं वोढुं न शक्नुवन्ति। राज्ये सार्वजनिक-परिवहनं वैद्युत-वाहनानि प्रति नेतुं केवलम् अनुदानस्य उद्घोषणा पर्याप्तं नास्ति; अपि तु अनुदानं, अनुज्ञापत्रं, एसआरटी-करः, वित्तकोष-वित्तपोषणं च— एतेषु चतुर्षु बिन्दुष्वापि व्यवहृता स्पष्टा च नीतिः अपेक्षिता। वैयक्तिक-चालकाः अस्याः नीतेः विरोधिनः न सन्ति, प्रत्युत ते स्वच्छ-आधुनिक-परिवहन-व्यवस्थायाः विकासे सहभागिनः भवितुम् इच्छन्ति। सङ्घेन प्रार्थितं यत् प्रतिनिधिभिः सह उपवेशनं विधातुं सर्वकारेण शीघ्रमस्य स्पष्टः कार्य-प्रारूपः (Roadmap) निर्गमनीयः।

# केन्द्र-सर्वकारद्वारा शीघ्रमेव संशोधिष्यन्ते आपदाश्रय-नियमाः, विनाश-स्थितेः प्रत्यक्ष-अवलोकनाय सम्प्राप्तं केन्द्रीय-दलम्, केन्द्र-समक्षं समर्पिष्यते प्रतिवेदनम्



**हिमसंस्कृतवार्ता — काङ्गड़ा।**
हिमाचलप्रदेशस्य काङ्गड़ा-मण्डले अस्मिन् प्रावृट्काले विपुल-वृष्ट्या, जलप्लवेन, भूस्खलनेन च सञ्जातायाः महत्याः विभीषिकायाः 'धरातलीय-स्तरे' (Ground Zero) समीक्षणाय मङ्गलवासरे अन्तर-मन्त्रालयीय-केन्द्रीय-दलम् अवतीर्णम्। गृह-मन्त्रालयस्य संयुक्त-सचिवस्य एम. रामचन्द्रडू-महोदयस्य नेतृत्वे आगतेन अनेन उच्च-स्तरीय-प्रतिनिधि-मण्डलेन सुधेड़-क्षेत्रस्य, मैक्लोडगञ्ज-स्थस्य 'खड़ा-डण्डा'-मार्गस्य, बोह-उपत्यकायाश्च (Boh Valley) प्रत्यक्ष-निरीक्षणं विहितम्। अस्मिन् अवसरे संयुक्त-सचिवेन एम. रामचन्द्रडू-महोदयेन विज्ञापितं यत् आपदा-सहायता-मानकानां संशोधन-प्रक्रिया केन्द्र-स्तरे अन्तिम-चरणे वर्तते, राज्यस्य हितानि च केन्द्र-सर्वकारस्य समक्षं दृढतया उपस्थापयिष्यन्ते। सुधेड़-क्षेत्रे काङ्गड़ा-मण्डलस्य उपायुक्तेन हेमराज-बैरवा-महोदयेन विनाश-ग्रस्त-मार्गाणां तथा च आपदा-प्रभावितानां क्षेत्राणां भयङ्कर-स्थितेः विषये केन्द्रीय-दलम् अवगतं कृतम्। उपायुक्तः न्यवेदयत् यत् अस्मिन् वर्षर्तौ जातेन प्रकोपेन पञ्चदश (१५) जनाः मृताः, षट्सप्ततिः (७६) पशवश्च विनष्टाः।

## लोक-निर्माण-विभागस्य जल-शक्तेश्च महती वित्तीय-क्षतिः

आपदया सर्वाधिकं सङ्कटं लोक-निर्माण-विभागेन जल-शक्ति-विभागेन च सम्मुखीकृतम्। नूरपुर-देहरा-पालमपुर-मण्डलेषु ८५४ किलोमीटर-परिमित-मार्गाणां भङ्गेन प्रायः २६९.७७ कोटि-रूप्यकाणां क्षतिः आङ्किता अस्ति। अपरत्र ४२८ पेयजल-परियोजनानां क्षत्या ६४.०६ कोटि-रूप्यकाणाम् आर्थिक-हानिः सञ्जाता।
विनाशस्य यथार्थ-चित्रम् अवलोकयितुं केन्द्रीय-दलं शाहपुर-विधानसभा-क्षेत्रस्य बोह-उपत्यकाम् अपि गतवत्। अत्र उपायुक्तः विज्ञापितवान् यत् विगत-२१ जुलाई दिनाङ्के विपुल-वृष्टेः कारणेन 'घडगूं'-ग्रामस्य द्वाविंशति-परिवाराणां (२२) पञ्चनवतिः (९५) जनाः प्रभाविताः अभवन्, येभ्यः सद्यः साहाय्यं दत्त्वा अस्थायि-आश्रय-शिबिरेषु प्रेषितम् आसीत्। उपायुक्तेन हिमाचल-सर्वकारेण आपदा-आश्रय-राशौ १.३० लक्ष-रूप्यकेभ्यः अष्ट-लक्ष-रूप्यकाणि (८ लक्ष) यावत् कृतेन वर्धनेन सह केन्द्र-सर्वकारस्यापि आपदा-आश्रय-मानदण्डेषु संशोधनस्य आग्रहः कृतः।

## तिब्बती-धर्मगुरु-दलाईलामा-महोदयस्य आशीर्वादः स्वीकृतः

अस्य महत्त्वपूर्ण-प्रवासस्य मध्ये केन्द्रीय-प्रतिनिधि-मण्डलेन धर्मशाला-स्थस्य विश्व-प्रसिद्धस्य 'एचपीसीए' (HPCA) क्रिकेट-क्रीडाङ्गणस्य अपि निरीक्षणं कृतम्। तदनन्तरं मैक्लोडगञ्जे दलस्य सदस्यैः तिब्बती-बौद्ध-धर्मगुरुणा दलाईलामा-महोदयेन सह शिष्टाचार-मेलनं विहितम्, तस्य आशीर्वादश्च गृहीतः। काङ्गड़ा-मण्डले विनाशस्य साकल्येन समीक्षा-समाप्तौ जल-शक्ति-ग्रामीण-विकास-विभागानां तथा च 'इसरो' (ISRO) संस्थायाः अधिकारिणा डा.. शशिवर्धन-रेड्डी-सहितेन अस्मिन् केन्द्रीय-दलेन अग्रिम-विरामस्थलस्य कुल्लू-मण्डलस्य क्षतेः आकलनाय प्रस्थानं कृतम्।

# 'एसआरटी' तथा च वाहने कर-सम्बन्धे स्पष्टादेशस्य अपेक्षा

वैयक्तिक-बस-चालक-सङ्घेन वैद्युत-बस-यानेषु प्रयुज्यमानस्य 'विशेष-मार्ग-करस्य, मोटर-वाहन-करस्य, अन्यासां च देय-राशीनां विषये सर्वकार-पक्षतः स्पष्टादेशाः याचिताः। चालकानां कथनम् अस्ति यत् यान-क्रयणात् पूर्वमेव तेभ्यः ज्ञातव्यं यत् आगामिषु वर्षेषु कति कराः समर्पणीयाः भविष्यन्ति तथा च वैद्युत-यानेभ्यः काः काः विमुक्ताः लप्स्यन्ते।



# कालका-शिमला-रेलमार्गे ३१ अक्तूबर् पर्यन्तं १० रेलयानानि निरस्तीकृतानि; द्वयोः आंशिक-सञ्चालनं प्रवर्तिष्यते, अधिसूचना निर्गता

हिमसंस्कृतवार्ता — शिमला। कालका-शिमला-विश्व-धरोहर-नैरोगेज-रेलमार्गे 'टकसाल'-'गुम्मन'-स्थानयोः मध्ये सप्तपञ्चाशत्-सङ्ख्यकस्य सेतोः समीपे क्षतिग्रस्ते रेलमार्गे प्रचलन्तं पुनर्निर्माण-कार्यं विचिन्त्य रेल-प्रशासनेन रेलयानानां निरस्तीकरण-कालावधिः ३१ अक्तूबर् २०२६ पर्यन्तं संवर्धिता। रेल-विभागेन निर्गतया नूतन-अधिसूचनया १ अक्तूबर् तः ३१ अक्तूबर् पर्यन्तम् अस्मिन् विभागे दश (१०) प्रमुख-रेलयानानि साकल्येन स्थगितानि भविष्यन्ति, यत्रैव द्वयोः रेलयानयोः आंशिकं सञ्चालनं विधास्यते। अधिसूचनानुसारम्
> ऊर्ध्व-दिशः (Up Direction) रेलयानानि: ५२४५७, ५२४५१, ५२४५९, ५२४५५ तथा च अप-मिक्स्। > अधो-दिशः (Down Direction) रेलयानानि: ५२४५८, ५२४५२, ५२४६०, ५२४५६ तथा च डाउन-मिक्स् (कालका-शिमला-मार्गस्य)। एतानि सर्वाणि दश रेलयानानि समग्र-अक्तूबर्-मासस्य कृते निरस्तीकृतानि सन्ति।

## द्वयोः रेलयानयोः आंशिकं सञ्चालनम्

अपरत्र यात्रिकाणां सौकर्यार्थं द्वे रेलयाने आंशिक-रूपेण सञ्चालयिष्येते:
1. यान-सङ्ख्या ५२४५३: अस्य सञ्चालनं केवलं धर्मपुर-तः शिमला-पर्यन्तं भविष्यति; कालका-तः धर्मपुर-पर्यन्तम् इदं निरस्तं स्थास्यति।
2. यान-सङ्ख्या ५२४५४: अस्य सञ्चालनं केवलं कालका-तः धर्मपुर-पर्यन्तम् एव भविष्यति; धर्मपुर-तः शिमला-पर्यन्तम् अस्य यात्रा स्थगिता भविष्यति। उल्लेखनीयं यत् भीषण-वृष्ट्या ५७-सङ्ख्यकस्य सेतोः अधः विद्यमाना मृत्तिका प्रवाहिता अभवत्, येन रेल-यातायातम् अवरुद्धम् आसीत्। साम्प्रतं रेलमार्गस्य पुनर्स्थापन-कार्यं युद्ध-स्तरेण क्रियमाणम् अस्ति। रेल-मण्डलेन (Railway Board) यात्रिकाः प्रार्थिताः यत् अक्तूबर्-मासे अस्मिन् मार्गे यात्रा-नियोजनात् पूर्वं रेलयानानां वर्तमान-स्थितेः सम्यक् समीक्षणं विधातव्यम्।

# मुख्यमन्त्रिणः सुक्खू-महोदयस्य अध्यक्षतायां पञ्चमे अक्टूबर-दिनाङ्के मन्त्रिमण्डलस्य उपवेशनम्; रिक्त-पदानां शिक्षक-नियुक्तीनां च विषये भविष्यन्ति प्रमुखाः निर्णयाः



**हिमसंस्कृतवार्ता — शिमला।**
हिमाचलप्रदेश-मन्त्रिमण्डलस्य (Cabinet) आगामि-उपवेशनस्य तिथिः निश्चिता जाता। पूर्वं ११ सितम्बर दिनाङ्के आयोज्यमानम् इदम् उपवेशनं स्थगितं जातम् आसीत्, यत् अधुना ५ अक्टूबर् दिनाङ्के आयोजितं भविष्यति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयस्य अध्यक्षतायां सम्पाद्यमाने अस्मिन् उपवेशने शिक्षा-स्वास्थ्य-सहितेषु विविध-विभागेषु सम्बद्धानां महत्त्वपूर्ण-प्रस्तावानां परिचर्चा विधास्यते। उपवेशने विविधानां विभागानां रिक्त-पदानां पूरणार्थं प्रस्तावाः प्रमुखतया आगमिष्यन्ति।
सर्वकार-पक्षतः नियुक्ति-प्रक्रियाणां त्वरित-गत्या सम्पादनाय तथा च रिक्त-पदानां पूरणाय निरन्तरं बलं दीयते। एतदतिरिक्तम् आयव्ययक-घोषणानां विविधानां मन्त्रिमण्डलीय-उपसमितीनां संस्तुतीनां, विभागानां च प्रशासनिक-प्रस्तावानाम् उपरि मन्त्रिमण्डलेन निर्णयाः स्वीकरिष्यन्ते।

# श्रीनगरे गढ़वालविश्वविद्यालये 'हिमालयः अस्ति चेत् वयमपि स्मः' इत्यन्तर्गतं राष्ट्रियसङ्गोष्ठ्यां तकनीकीसत्राणाम् आयोजनम्




**श्रीनगरम्।कुलदीपमैन्दोला।**
हेमवतीनन्दनबहुगुणागढवालविश्वविद्यालयस्य तत्त्वावधाने चौरासपरिसरस्य शैक्षणिककेन्द्रे (अकादमिककेन्द्रे ) 'हिमालयः अस्ति चेत् वयमपि स्मः' इत्यस्याः आयोजितायाः द्विदिवसीयराष्ट्रियसङ्गोष्ठ्याः द्वितीयदिने विविधानां तकनीकीसत्राणाम् आयोजनम् अभवत्।

## हिमालयात् एव हिन्दुस्थानस्य अस्तित्वं-डा.शैलपुत्री

सङ्गोष्ठ्याः प्रारम्भे डॉ. कविता भट्टमहोदया सर्वेषाम् अतिथीनां, वक्तृणाम्, शोधार्थिनाम्, विद्यार्थिनां च हार्दिकं स्वागतं कृतवती। वैदिक-ऋचायाः सन्दर्भं प्रस्तुत्य तया प्रतिपादितं यत् हिमालयात् एव हिन्दुस्थानस्य अस्तित्वं विशिष्टं च परिचितिः विद्यते। डॉ. धीरजकुमारशर्मा सङ्गोष्ठ्याः उद्देश्यानि हिमालयसंरक्षणस्य आवश्यकतां च विशदरूपेण निरूपितवान्।

**हिमालयस्य सामाजिकं सांस्कृतिकं च महत्त्वम्**

कार्यक्रमस्य अध्यक्षः प्रो. हरिभजनसिंहचौहानः हिमालयस्य सामाजिक-सांस्कृतिकमहत्त्वे उक्तवान्। अस्मिन्नवसरे विश्वविद्यालयस्य कुलसचिवः प्रो. वाई. पी. रेवानी अपि स्वविचारान् प्रस्तुतवान्। कार्यक्रमस्य संयोजकः प्रो. एम्. एस्. पंवारः युवासन्ततिं पर्यावरणसंरक्षणकार्ये सक्रियभागग्रहणाय आहूतवान्। कार्यक्रमस्य विशिष्टातिथिः प्रो. महावीरसिंहनेगी हिमालयीयक्षेत्रस्य तत्रत्यानां जनानां च सम्मुखे वर्धमानानाम् पर्यावरणीयसङ्कटानां विषये सर्वेषाम् अवधानम् आकर्षितवान्।

## जैवविविधतायाः संरक्षणे सामुदायिकसहभागितायाः महत्त्वम्

परिचर्चासत्रे प्रो. जितेन्द्रभूटोला, डॉ. आलोकसागरगौतमः, डॉ. आशीषबहुगुणः, एवलदेवः राघवेन्द्रः च विषयविशेषज्ञत्वेन विद्यार्थिभिः शोधार्थिभिः सह स्वविचारान् संविभक्तवन्तः। अस्मिन् विषये महत्त्वपूर्णा परिचर्चा समायोजिता, यस्यां हिमालयसंरक्षणस्य विविधपक्षेषु विचारविनिमयः अभवत्। अनेकैः प्राध्यापकैर् शोधार्थिभिश्च सहभागिता कृता। कार्यक्रमे प्रो. रश्मि ड्योढी, प्रो. आर्. एस्. नेगी, प्रो. आर्. एस्. फर्तियालः, प्रो. अनिलनौटियालः, प्रो. बी. पी. नैथानी, डॉ. रञ्जनकर्माकरः, डॉ. नरेन्द्रकुमारः, डॉ. हसीबुर्रहमानः, रोहितछौंकरः, जायनजिलोसो, भावनासिवाचः, सौरभः, मोनिका, उज्ज्वलः, स्वीटी च उपस्थिताः भूत्वा कार्यक्रमस्य शोभाम् अवर्धयन्।

**आभारप्रदर्शनेन सङ्गोष्ठ्याः समापनम्**

कार्यक्रमस्य अन्ते प्रो. विजयकान्तपुरोहितः सर्वेषाम् अतिथीनां, शिक्षकाणां, शोधार्थिनां, विद्यार्थिनां च प्रति कृतज्ञतां प्रकटितवान्। सम्पूर्णायां सङ्गोष्ठ्यां हिमालयस्य सततसंरक्षणस्य, तस्य प्राकृतिक-सांस्कृतिकसम्पदः रक्षणस्य, भावीसन्ततीनाम् कृते हिमालयीयसमृद्धेः संरक्षणस्य च सन्देशः प्रमुखतया समुत्थापितः। पर्यावरणसन्तुलनस्य स्थापनायै प्रकृत्यनुकूलजीवनशैली, सामुदायिकसहभागिता, युवजनानां सक्रियभूमिका च अत्यन्तम् आवश्यकी इति विचारः सङ्गोष्ठ्याः माध्यमेन अभिव्यक्तः।

# "बेङ्गलूरु नगरे ३५ तमः वार्षिकः ५ दिवसीयः कार्यक्रमः "वस्त्राभरण"

**रविः खरिदेहालः - बेङ्गलूरु।** १.१०.२०२६ दिनाङ्कात् ५.१०.२०२६ पर्यन्तम् वस्त्राभरणप्रदर्शनी आयोजने यत् सम्पूर्ण देशात् तन्तुवायः शिल्पकारः च एकत्र आनयिष्यति । प्रदर्शनी मेघधनुष इति विषयः अस्ति। प्रदर्शनीषु आभूषणं, हस्तग्रथनानि वस्त्राणि, शाटिकाः इत्यादयः वस्त्राणि सन्ति । पुरस्कारविजेतारः शिल्पिनः यथा रामकिशोर चिप्पः, बृजबल्लभ उदैवालः, अनुराधा पेगू च प्र दर्शनं कुर्वन्ति । ते क्रमशः बगरू दाबू च मुद्रणम्, सांगानेरी मुद्रणम्, हस्त तन्तु मुगा च कर्याणी प्रसिद्धः । प्रदर्शन्याः अन्येषु मुख्यविषयेषु वञ्जिरी रमेशस्य कर्नाटकस्य मोलकलमुरु रेशमशाटिकाः सन्ति ।

# देहल्याः प्रतिनिवृत्तः मुख्यमन्त्री सुक्खू-महोदयः; दिन-द्वयं ग्रामेषु उषित्वा जनैः सह करिष्यति प्रत्यक्ष-संवादम्

**हिमसंस्कृतवार्ता — शिमला।**
देहली-प्रवासात् प्रतिनिवृत्तस्य मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य १ अक्टूबर् तः ३ अक्टूबर् पर्यन्तं त्रि-दिवसीयस्य प्रवासस्य कार्यतालिका निर्गता। अस्मिन् प्रवासे मुख्यमन्त्री रोहडू, चिड़गांव, भटवाड़ी, रामपुरं, काशा-क्षेत्रेषु च विविधेषु कार्यक्रमेषु भागं ग्रहीष्यति। कार्यक्रम-क्रमानुसारं १ अक्टूबर् दिनाङ्कस्य रात्रौ भटवाड़ी-ग्रामे तथा च २ अक्टूबर् दिनाङ्के पाट-ग्रामे मुख्यमन्त्रिणः रात्रि-विश्रामः भविष्यति।
१ अक्टूबर् दिनाङ्के मुख्यमन्त्री रोहडू-नगरे छात्रैः सह सम्भाषणं करिष्यति तथा च 'मादक-द्रव्य-विरोधि-अभियाने' (Anti-Chitta Rally) सम्मिलितः भविष्यति। चिड़गांव-स्थले विविध-विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च विधाय जनसभां सम्बोधयिष्यति। ततः भटवाड़ी सम्प्राप्य 'सर्वकारः ग्रामस्य द्वारे' (सरकार गांव के द्वार) कार्यक्रमेण सह जनैः, महिला-मण्डलैः, युवक-मण्डलैश्च सह संवादं विधास्यति।
२ अक्टूबर् दिनाङ्के गान्धी-जयन्ती-अवसरे भटवाड़ी-ग्रामे महात्मा-गान्धिनः लालबहादुर-शास्त्रिणश्च चित्रपटयोः पुष्पाञ्जलिं समर्पयिष्यति। तदनन्तरं रोहडू-तः आकाशमार्गेण रामपुरस्य शिंगला-स्थानं प्राप्स्यति, यत्र नोग-उपत्यकायाः जनैः सह संवादं करिष्यति। ततः काशा-स्थले 'सर्वकारः ग्रामस्य द्वारे' कार्यक्रमान्तर्गतं जन-संवादं विधाय रात्रौ पाट-ग्रामे निवत्स्यति।
३ अक्टूबर् दिनाङ्के प्रातः काले सः नोगली-क्षेत्रे जनसभां सम्बोधयिष्यति, तदनन्तरं रामपुर-स्थे पदम-उत्कृष्ट-राजकीय-वरिष्ठ-माध्यमिक-विद्यालये छात्रैः सह वार्तालापं करिष्यति तथा च मादक-द्रव्य-विरोधि-यात्रां सङ्केत-पताकया प्रवर्त्य स्वयं भागं नेष्यति। मध्याह्ने शिंगला-हेलीपैडतः शिमलां प्रतिनिवृत्य ओक्-ओवर्-आवासं प्राप्स्यति। इदं त्रि-दिवसीय-भ्रमणं ३ अक्टूबर् दिनाङ्के अपराह्ने सार्ध-त्रि-वादने (३:३०) सम्पूर्णं भविष्यति।

# वार्ता-संवादः



**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया काश्चन विचित्राः वार्ताः श्रुताः। एकया मात्रा एक-नवजातान्तर्गतानि स्वीयानि चत्वारि अपत्यानि, गृहे एकाकीनि त्यक्तानि। तया विलास-नौका-यात्रा कृता।
**नन्दिनी-** अहो कष्टम्! सा कुमाता इति सिद्धम्। अपरा वार्ता अपि मया श्रुता। कृत्रिमबुद्ध्या स्वामिनः गृहसङ्केतः प्रकटितः। तया विपण्यां कीलफलकं विक्रीतम्, क्रेत्रे च सङ्केतः दत्तः।
**काव्या-** आश्चर्यम्! यन्त्राणि अपि विश्वसनीयानि न सन्ति। मया एका कला-विषयिणी वार्ता अपि पठिता। एकेन शिल्पकारेण वंश-वृक्षेण सम्पूर्णं धूमशकट-यन्त्रं निर्मितम्।
**नन्दिनी-** अहो तस्य कौशलम्! वंशेन निर्मितं यन्त्रम् अतीव सुन्दरम् भवेत्। अन्येन चतुर्दश-वर्षीयेण बालकेन अपि अवकरवस्तुभिः विद्युद्वाहनं रचितम्।
**काव्या-** अतीव उत्तमम्! बालेन महत् कार्यं कृतम्।



# पितृपक्षः पूर्वजेभ्यः कृतज्ञतायाः पर्व



- डॉ रमेशचन्द्रपाण्डेयः, ज्योतिषाचार्यः
संरक्षकः उत्तराखंडविद्वत्सभा देहरादूनम् ,

सनातनधर्मपरम्परायां पितृपक्षस्य विशेषं धार्मिकं सांस्कृतिकं च महत्त्वम् अस्ति। अस्मिन् काले श्रद्धया विधिविधानपूर्वकं श्राद्धं, तर्पणं, पिण्डप्रदानं च क्रियते। धार्मिकमान्यतानुसारं एतेन कर्मणा पितरः तृप्ताः भवन्ति तथा मनुष्यः स्वपूर्वजेभ्यः विद्यमानं पितृऋणं परिशोधयितुं प्रयतते। पितृणां प्रति श्रद्धया क्रियमाणं कर्म 'श्राद्धम्', तृप्त्यर्थं जलस्य अर्पणं 'तर्पणम्' इति कथ्यते। वेदेषु च पितृणां सम्बन्धी यज्ञः 'पितृयज्ञः' इति निर्दिष्टः अस्ति।

शोधच्छात्रौ कर्मकाण्डाचार्यौ रविन्द्रतिवारी उदयतिवारी च 'हिन्दूस्थानसमाचार' इत्यनेन सह वार्तालापे अवदतां यत् श्रद्धया सत्येन च क्रियमाणं कर्म श्राद्धम् इति कथ्यते। मातापितृभ्यः, आचार्येभ्यश्च तृप्त्यर्थं क्रियमाणं कर्म तर्पणम् इति निर्दिश्यते। तयोः अनुसारं श्राद्धतर्पणं केवलं धार्मिकमनुष्ठानं न, अपि तु पूर्वजानां, मातापित्रोः तथा आचार्याणां प्रति सम्मानस्य कृतज्ञतायाश्च अभिव्यक्तेः प्राचीनः संस्कारः अपि अस्ति। सम्प्रति पितृपक्षः प्रचलति।

**पञ्चमहायज्ञेषु पितृयज्ञस्य स्थानम्**

वेदपरम्परायां पञ्चमहायज्ञानां विशेषं महत्त्वम् अस्ति। ब्रह्मयज्ञः, देवयज्ञः, पितृयज्ञः, भूतयज्ञः तथा अतिथियज्ञश्च पञ्चमहायज्ञाः इति प्रसिद्धाः। पुराणेषु धर्मशास्त्रेषु च एतेषां विस्तरेण विवेचनं प्राप्यते। तेषु पितृयज्ञः कालक्रमेण श्राद्धकर्मरूपेण विस्तृतां धार्मिकपरम्परां प्राप्तवान्।

आचार्याणां मतानुसारं सन्ततिः केवलं वंशपरम्परायाः संवाहिका न, अपि तु संस्काराणां ज्ञानस्य च वाहिका अपि अस्ति। अतः सन्तत्युत्पादनं, सन्ततेः समुचितसंस्कारप्रदानं, शिक्षाप्रदानं च पितृऋणपरिशोधनस्य व्यापकभावनया सम्बद्धं मन्यते। अस्मात् एव भावात् पितृयज्ञस्य परम्परा केवलं मृतपूर्वजानां स्मरणपर्यन्तं सीमिता न भवति।

**आश्विनकृष्णपक्षे श्राद्धकर्म**

आश्विनमासस्य कृष्णपक्षः पितृपक्षः इति प्रसिद्धः। सूर्यस्य कन्याराशौ स्थितिकाले आगतः अयं कृष्णपक्षः पितृणां स्मरणाय, श्राद्धतर्पणादिकर्मणां च कृते विशेषरूपेण महत्त्वपूर्णः मन्यते। धार्मिकमान्यतानुसारं अस्मिन् काले अथवा सम्बन्धितस्य पितुः मृत्युतिथौ श्राद्धं तर्पणं च कृतं चेत् पितृणां तृप्तिर्भवति।

केषुचित् धार्मिकग्रन्थेषु, लोकपरम्परासु च मान्यता अस्ति यत् पितृपक्षे श्राद्धं न कृतं चेत् पितरः अनन्तरकालपर्यन्तं श्राद्धस्य प्रतीक्षां कुर्वन्ति। अतः पितृपक्षः पूर्वजानां स्मरणस्य, तेषां प्रति कृतज्ञतायाः, पारिवारिकदायित्वस्य पुनःस्मरणस्य च अवसररूपेण मन्यते।

**श्राद्धस्य विविधाः प्रकाराः, तर्पणस्य षड्भेदाः**

धर्मशास्त्रेषु श्राद्धस्य अनेकाः प्रकाराः वर्णिताः सन्ति। नित्यश्राद्धं, नैमित्तिकश्राद्धं, काम्यश्राद्धं, वृद्धिश्राद्धं, पार्वणश्राद्धं, सपिण्डनश्राद्धं, गोष्ठश्राद्धं, शुद्धिश्राद्धं, कर्माङ्गश्राद्धं, दैविकश्राद्धं, यात्राश्राद्धं पुष्टिश्राद्धं च तेषु प्रमुखानि सन्ति।

तर्पणमपि षड्विधं मन्यते। देवतर्पणम्, ऋषितर्पणं, दिव्यमानवतर्पणं, दिव्यपितृतर्पणं, यमतर्पणं, मनुष्यपितृतर्पणं च तस्य प्रमुखाः भेदाः सन्ति। एतेषां माध्यमेन देवतानां, ऋषीणां, पितृणां तथा अन्येषां प्रति कृतज्ञताभावः व्यक्तः भवति।

**सात्त्विकजीवनस्य सन्देशः**

पितृपक्षस्य परम्परा केवलं कर्मकाण्डपर्यन्तं सीमिता नास्ति। अस्य काले संयमितां सात्त्विकीं च जीवनशैलीम् अवलम्बितुं बलं दीयते। व्यसनात् मांसाहाराच्च परिहरणम्, शुचितायाः पालनम् तथा श्रद्धया श्राद्धकर्मकरणं धार्मिकपरम्परायां महत्त्वपूर्णं मन्यते।

सामान्यतः रात्रौ श्राद्धं न क्रियते। दिवसे, विशेषतः मध्याह्नसमये, श्राद्धकर्म करणम् उपयुक्तं मन्यते। श्राद्धकर्मणि काकाय, श्वानाय, गोवे च अन्नस्य अंशं प्रदातुं परम्परा अस्ति। धार्मिकमान्यतानुसारं एतेषां जीवाणां पितृभिः यमेन च विशेषः सम्बन्धः मन्यते।

**उत्तरभारते विशिष्टं माहात्म्यम्**

पितृपक्षस्य परम्परा सम्पूर्णे भारते विभिन्नरूपैः प्रचलिता अस्ति। उत्तरभारते उत्तरपूर्वभारते च अस्य धार्मिकं माहात्म्यं विशेषरूपेण दृश्यते। दक्षिणभारतेऽपि पूर्वजानां स्मरणस्य तर्पणस्य च परम्परा विभिन्नैः नामभिः प्रचलिता अस्ति।

तमिलनाडुराज्ये 'आद्यमावास्या', केरले 'कारिकडवावुबली', महाराष्ट्रे च 'पितृपन्धरवडा' इत्यादिभिः नामभिः पूर्वजानां स्मरणस्य परम्परा प्रचलिता अस्ति। नामसु आचारपद्धतिषु च भेदः दृश्यते, किन्तु पूर्वजेभ्यः श्रद्धां कृतज्ञतां च व्यक्तुं मूलभावना सर्वत्र समानैव दृश्यते।

**श्राद्धं तथा सन्तत्यायुःसमृद्धिः**

धार्मिकग्रन्थेषु श्रद्धया कृतस्य श्राद्धस्य सन्तत्या, आयुषा, आरोग्येण, यशसा, बलेन, धनधान्येन, समृद्ध्या च सम्बन्धः वर्णितः अस्ति। पुराणपरम्परायां मान्यता अस्ति यत् श्राद्धकर्मणा पितरः तृप्ताः भवन्ति तथा तृप्ताः पितरः स्ववंशजेभ्यः आयुः, पुत्रान्, यशः, पुष्टिं, बलं, वैभवं, सुखं तथा समृद्धिं च आशीर्वादरूपेण प्रयच्छन्ति।

एताः मान्यताः धार्मिकपरम्परायाः भागरूपेण अवगन्तव्याः। तेषां मूलसन्देशः परिवारस्य पूर्वपरम्परायाः स्मरणं तथा वर्तमानसन्ततेः प्रति उत्तरदायित्वबोधस्य निर्माणम् इति दृश्यते।

**मृत्योः पुनर्जन्मनश्च मध्ये पितृलोकस्य अवधारणा**

सनातनधर्मस्य विविधासु परम्परासु मृत्योः अनन्तरं जीवस्य यात्रा तत्काले पुनर्जन्मपर्यन्तं सीमिता न मन्यते। कासुचित् धार्मिकमान्यतासु मृत्योः पुनर्जन्मनश्च मध्ये पितृलोकस्य अवधारणा वर्णिता अस्ति।

आचार्याणां मतानुसारं केषाञ्चित् आत्मनां शीघ्रं पितृलोकं प्राप्तुं मान्यता अस्ति, केषाञ्चित् कृते च एषा अवधि दीर्घा भवितुम् अर्हति। मृत्योः अनन्तरं त्रयोदशे दिने क्रियमाणं त्रयोदशकर्म तथा ततः परं विभिन्नासु तिथिषु क्रियमाणानि कर्माणि अपि धार्मिकपरम्परायां महत्त्वपूर्णानि मन्यन्ते। एकवर्षस्य अनन्तरं तर्पणं श्राद्धं च कर्तुं परम्परा अपि अस्य धार्मिकविश्वासस्य भागः अस्ति।

धार्मिकमान्यतानुसारं पितृलोकस्य अनन्तरं जीवः स्वकर्मानुसारं पुनर्जन्म प्राप्नोति अथवा साधनया मोक्षमार्गे अग्रे गच्छति। अत्र पितृलोकस्य अवधारणा जीवनस्य निरन्तरतां कर्मफलसिद्धान्तं च सम्बध्नाति।

**गयायां पिण्डदानस्य विशिष्टं महत्त्वम्**

पितृकर्मणि गयायाः विशेषं स्थानम् अस्ति। येषां पूर्वजानां कृते विशेषतर्पणस्य पिण्डदानस्य वा आवश्यकता मन्यते, तेषां कृते गयायां पिण्डदानस्य परम्परा प्राचीनकालात् प्रचलिता अस्ति। गया पितृकर्मणः प्रमुखं तीर्थम् इति धार्मिकपरम्परायां प्रसिद्धम् अस्ति।

धर्मशास्त्रेषु पितृणां निवासाय पितृलोकस्य अवधारणा प्राप्यते। केषुचित् ग्रन्थेषु तस्य चन्द्रस्य ऊर्ध्वभागेन सम्बन्धः अपि वर्णितः अस्ति। धार्मिकपरम्परायां दिव्यपितरः तथा मनुष्यपितरश्च इति द्वे श्रेण्यौ उल्लिखिते स्तः।

दिव्यपितृणां सन्दर्भे यमराजस्य विशेषं स्थानं मन्यते। अर्यमा अपि पितृणां देवता तथा पितृषु श्रेष्ठः इति वर्णितः अस्ति। पुराणेषु अर्यमाणं महर्षेः कश्यपस्य अदित्याश्च पुत्रं, देवानां भ्रातरं च वर्णितम् अस्ति। उत्तराफाल्गुनीनक्षत्रं तस्य निवासलोकः इति धार्मिकमान्यता अस्ति।

**अमावस्यायाः विशिष्टं महत्त्वम्**

पितृपक्षस्य अमावस्या पितृणां तृप्त्यर्थं विशेषरूपेण महत्त्वपूर्णा मन्यते। अस्यां तिथौ श्राद्धं, तर्पणं तथा पिण्डप्रदानं विशेषफलदायकं मन्यते। अमावस्यायाः

क्रमशः.. अतिरिक्तं कतिपयासु विशेषतिथिषु, सङ्क्रान्तौ, व्यतीपाते, ग्रहणकाले च पितृतर्पणस्य श्राद्धस्य च विधानं धार्मिकग्रन्थेषु उल्लिखितम् अस्ति। मान्यता अस्ति यत् पितृपक्षे पितृणां पृथिवीलोकेन सह विशेषः सम्बन्धः भवति। अतः अस्मिन् काले तर्पणस्य, श्राद्धस्य तथा पिण्डदानस्य महत्त्वं विशेषरूपेण वर्धते।

**पूर्वजेभ्यः कृतज्ञतायाः पर्व**

वस्तुतः पितृपक्षः केवलं कर्मकाण्डस्य पर्व नास्ति। अयं पूर्वजेभ्यः स्मरणं, श्रद्धां, कृतज्ञतां च व्यक्तुं प्रचलिता सांस्कृतिकपरम्परा अस्ति। मनुष्यस्य वर्तमानजीवनं पूर्वजानां संस्कारैः, शिक्षया, परिश्रमेण, त्यागेन च निर्मितम् अस्ति। अतः पितृपक्षः स्वकीयमूलानां प्रति पुनः उन्मुखीभवनस्य अवसरं प्रददाति।श्राद्धतर्पणाभ्यां व्यक्तिः स्वमातापित्रोः, पूर्वजानाम् आचार्याणां च प्रति स्वकीयस्य दायित्वस्य सम्मानस्य च भावं प्रकटयति। पितृयज्ञस्य व्यापकः सन्देशः एष एव यत् यः समाजः स्वपूर्वपरम्परां स्मरति, सः स्वसन्ततेः प्रति अपि उत्तरदायित्वं सम्यक् निर्वहति। अतः पितृपक्षः मृतपूर्वजानां स्मरणमात्रस्य पर्व न, अपि तु परिवारस्य, परम्परायाः, संस्काराणां, कृतज्ञतायाः च जीवितं प्रतीकम् अस्ति। श्रद्धया कृतं स्मरणं मनुष्यं स्वमूलैः संयोजयति तथा वर्तमानजीवनस्य दायित्वानां प्रति अपि जागरूकं करोति।



# श्रद्धया यत् कर्म क्रियते तत् श्राद्धम्

श्राद्धं भारतीयसंस्कृतेः महत्त्वपूर्णः धार्मिकः संस्कारः अस्ति। श्राद्धशब्दः “श्रद्धा” इति शब्दात् निष्पद्यते। श्रद्धया यत् कर्म क्रियते तत् श्राद्धम् इति कथ्यते। अस्मिन् कर्मणि मनुष्यः स्वस्य पितृन् स्मरति, तेषां प्रति श्रद्धां च प्रकटयति।

भारतीयपरम्परायां पितृणां विशेषं महत्त्वम् अस्ति। माता पिता च अस्माकं जीवनस्य आधारौ स्तः। ते अस्मभ्यं जीवनं, संस्कारान्, ज्ञानं, प्रेम च ददतः। अतः तेषां स्मरणं सम्मानं च अस्माकं कर्तव्यम् अस्ति।श्राद्धकर्म मुख्यतः पितृपक्षे क्रियते। पितृपक्षः सामान्यतः भाद्रपदमासस्य पूर्णिमायाः अनन्तरं आश्विनमासस्य अमावास्यापर्यन्तं भवति। अस्मिन् काले जनाः स्वपितृणां स्मरणं कुर्वन्ति तथा तेषां नाम्ना तर्पणं, पिण्डदानं, ब्राह्मणभोजनं च कुर्वन्ति।श्राद्धे तिलस्य, जलस्य, कुशस्य च विशेषं महत्त्वम् अस्ति। तर्पणसमये जलं तिलैः सह पितृभ्यः समर्प्यते। पिण्डदानं च श्रद्धया क्रियते। अनेकाः जनाः अस्मिन् समये निर्धनेभ्यः, साधुभ्यः तथा आवश्यकतावद्भ्यः भोजनं वस्त्रं च ददति।श्राद्धस्य मुख्यः उद्देश्यः केवलं कर्मकाण्डः नास्ति, अपितु पूर्वजानां प्रति कृतज्ञताभावस्य प्रकाशनम् अपि अस्ति। अस्माभिः स्वपितृणां सद्गुणाः स्मर्तव्याः तथा तेषां आदर्शाः जीवने अनुसर्तव्याः।श्राद्धदिने परिवारस्य सदस्याः एकत्र मिलित्वा पितृन् स्मरन्ति। ते प्रार्थनां कुर्वन्ति तथा शान्त्यर्थं धार्मिककर्माणि कुर्वन्ति। श्राद्धं अस्मान् कर्तव्यबोधं, कृतज्ञतां, सेवाभावं च शिक्षयति।अतः श्राद्धं भारतीयसंस्कृतेः श्रद्धायाः, कृतज्ञतायाः, पारिवारिकपरम्परायाः च प्रतीकम् अस्ति। अस्माभिः पितृणां सम्मानः करणीयः तथा तेषां उत्तमपरम्पराः सदैव रक्षणीयाः।

-पण्डित दीपक शास्त्री, हरियाणा (जींद)



# आचार्यदिवाकरदत्तशर्मणः व्यक्तित्वकृतित्ववैभवम्

हिमांशुवद्धिमाचलावनिर्यशःसुशोभिता
विनम्रतायुतो हि यश्च विद्यया युतस्तथा।
सदोद्यतश्च संस्कृतस्य संस्कृतेश्च रक्षणे
श्रुतिप्रवीणपण्डितं दिवाकरं नमामि तम्॥

विद्यावारिधिरप्रमेयमहिमा धर्मैकनिष्ठो गुरुः
शास्त्रज्ञानविशारदो जनहिते नित्यं प्रवृत्तो मुदा।
वाग्देवीवदनारविन्दविलसद्वाणीप्रभादीपितो
लोके यस्य यशःप्रभा विजयते सोऽयं दिवाकारकः॥

शास्त्राणां विपुलं रहस्यविषयं यो वेत्ति निःसंशयं
वेदानां निगमादिशास्त्रविमलं तत्त्वं प्रकाशयादरात्।
शिष्याणां हृदये विवेकविभवं संस्कारदीपं तथा
दीपं ज्ञानमयं ददौ स सततं श्रीदत्तशर्मा गुरुः॥

भास्वद्विद्वदुपस्थितिं शुभकरीं विद्यामयीं निर्मलाम्
धौतां संस्कृतिमार्गदर्शनपरां सर्वार्थसंसाधिकाम्।
दीप्तं ज्ञानदिवाकरं सुविमलं शर्मा-कुलालङ्कृतम्
वन्दे शोधपथप्रदर्शकवरं सद्भक्तिभावैः सदा॥

प्राचीनस्य च शोधने निपुणता साहित्यतत्त्वग्रहे,
शास्त्रेषु प्रतिपादितं सुविमलं ज्ञानं प्रणीतं त्वया।
सत्यं शोधसमन्वितं सुवचनं लोकस्य कल्यायदे,
तत्ते ग्रन्थसमूहनम् बहुविधं भाति प्रभापूरितम्॥

अद्यास्मिन् सुभगे दिवाकरकवेः पुण्ये जयन्ती-क्षणे
श्रद्धापुष्पसमर्पणं सुविहितं काव्यप्रभामाधुरीम्।
जीवन्तो भवतः सुमार्गनिचया अस्मासु नित्या स्थिताः
कीर्त्याख्यं वपुराश्रितो गुरुवरः श्रेष्ठो जगद् भासकः॥



©रचयिता-
वत्सदेशराजशर्मा
संस्थापकाध्यक्षो
वैदिकगणः, भारतम्




# धर्मक्षेत्रे कुरुक्षेत्रे पितृपक्षस्य पावनोपलक्ष्ये 'तथास्तु संस्कृत अकादमी' द्वारा भव्यस्य 'अखण्ड-गीता-पारायण' महाऽनुष्ठानस्य दिव्यम् आयोजनम्

कुरुक्षेत्रम्। पुण्यधरायाः धर्मक्षेत्र-कुरुक्षेत्रस्य महिमानं प्रस्तौति सनातनशास्त्रवचनम्—

"गङ्गायां तु जले मुक्तिः वाराणस्यां जले स्थले।
कुरुक्षेत्रे त्रिधा मुक्तिः अन्तरिक्षे जले स्थले॥"

अर्थात् गङ्गायां जले, काश्यां जले स्थले च मुक्तिः लभ्यते, किन्तु परमपावने धर्मक्षेत्रे कुरुक्षेत्रे तु अन्तरिक्षे, जले, स्थले च—त्रिधा मुक्तिः प्राप्यते। एतादृश्याम् अलौकिक-पुण्यभूमौ कुरुक्षेत्रे पितृपक्षस्य पुण्यतमे अवसरे पूर्वजानां तृप्तये, शान्तये, सद्गतये च 'तथास्तु संस्कृत अकादमी, हरियाणा' इत्यनया संस्थया 'अखण्ड-गीता-पारायण' रूपस्य परममङ्गलमयस्य अनुष्ठानस्य आयोजनं क्रियते।

अकादमी-परिसरे प्रचलद् इदं दिव्यम् अनुष्ठानम् आगामी १ अक्टोबर् २०२६ तः १० अक्टोबर् २०२६ पर्यन्तं प्रतिदिनं निष्पादयिष्यते। अकादमी-निदेशकस्य डॉ. रविदत्तशर्मणः कुशलमार्गदर्शने सम्पाद्यमानम् एतत् पारायणं केवलं पाठमात्रं नास्ति, अपि तु पूर्वज-ऋणात् मुक्तिं प्राप्य कुलकल्याणाय, पितृप्रीत्यर्थं च समर्पिता एकीभूता आहुतिः अस्ति।

श्रीमद्भगवद्गीतायाः प्राकट्यस्थल्यां कुरुक्षेत्रे क्रियमाणः अखण्डपाठः पितृभ्यः अक्षय्यतृप्तिं, मोक्षप्रदामृतानुभूतिं च जनयति। यदि भवान्/भवती अपि स्वपितृणां परमाशिषः प्राप्तुं, कुलस्य अभिवृद्धये, पितृणां तृप्ति-सद्गति-कामनार्थं च अस्मिन् पावने महाऽनुष्ठाने सङ्कल्पपूर्वकं सहभागितां ग्रहीतुम् इच्छति, तर्हि अद्यैव सम्पर्कं कृत्वा स्वनामाङ्कनं सुनिश्चितं कुर्वन्तु।

॥ अनुष्ठान-विवरणम् ॥

**आयोजकः**: तथास्तु संस्कृत अकादमी, हरियाणा (ध्येयवाक्यम्: यथेच्छसि तथास्तु तत्)

**मार्गदर्शकः/निदेशकः**: डॉ. रविदत्त शर्मा

**पवित्रम् अनुष्ठानम्**: अखण्ड-गीता-पारायणम् (पितृपूजनम् | गीता-पारायणम् | पितृ-तृप्तिः | कुल-कल्याणम्)

**तिथिः**: १ अक्टोबर् तः १० अक्टोबर् २०२६ पर्यन्तम् (प्रतिदिनम् अखण्डपाठः)

**स्थानम्**: तथास्तु संस्कृत अकादमी परिसरः, धर्मक्षेत्रं कुरुक्षेत्रम् (हरियाणा)

**॥ सम्पर्क-सूत्राणि पञ्जीकरणाय च ॥**

दूरभाष-क्रमाङ्कः: 6006270619
विद्युत्-पत्रम्(ईमेल): tathastu88@gmail.com